जगदीशं तथानन्यो यदि विष्णुं स वैष्णवः ॥
समचित्तो मुनिः पूतो गोविन्दचरणाश्रयः ।
सर्व्वभूतदयः कार्ष्णो विवेकी साधुरुत्तमः ॥
कृष्णार्पितप्राणशरीरबुद्धिः
शान्तेन्द्रियस्त्रीसुतसम्पदादिः ।
आसक्तचित्तः श्रवणादिभक्ति-
ष्वस्येह साधुः सततं हरेर्यः ॥
कृष्णाश्रयः कृष्णकथानुरक्तः
कृष्णेष्टमन्त्रस्तुतिपूजनीयः ।
कृष्णानिशध्यानमनास्त्वनन्यो
यो वै स साधुर्मुनिवर्य्य कार्ष्णः ॥
यस्येष्टं श्रीभागवतं शास्त्रं श्रीभगवान् हरिः ।
भगवत्या समं लक्ष्म्या भक्त्या भागवतश्च सः ॥
ये कृष्णश्रवणाद्धृष्टा ये तदुच्छिष्टभोजिनः ।
ये कृष्णोपासका लोका दासास्ते परि-
कीर्त्तिताः ॥”
इति पाद्मे उत्तरखण्डे ९९ अध्यायः ॥*॥
अपि च ।
ब्रह्मोवाच ।
“अहो ध्यानैरपि ध्यातुं देवैस्त्वं न हि शक्यसे ।
स त्वं वैष्णवदेहेषु तिष्ठसीत्यद्भुतं महत् ॥
क्षणमात्रमपि स्वामिंस्तुष्टे त्वयि न किं भवेत् ।
स त्वं वैष्णवसङ्गेन भ्रमसीत्यद्भुतं महत् ॥
के वैष्णवाः कैटभारे ! किं वा तेषाञ्च लक्षणम् ।
कथं ज्ञेयाश्च ते सर्व्वे तन्मे कथय केशव ॥
भगवानुवाच ।
वैष्णवानां लक्षणानि कल्पकोटिशतैरपि ।
सम्यग्वक्तुं न शक्नोमि संक्षेपात् शृणु सत्तम ॥
संसारो वैष्णवाधीनो देवा वैष्णवपालिताः ।
अहञ्च वैष्णवाधीनस्तस्मात् श्रेष्ठाश्च वैष्णवाः ॥
क्षणमात्रमपि ब्रह्मन् विहाय वैष्णवं जनम् ।
तिष्ठामि नाहमन्यत्र वैष्णवो मम बान्धवः ॥
कामक्रोधविहीना ये हिंसादम्भविवर्ज्जिताः ।
लोभमोहविहीनाश्च ते ज्ञेया वैष्णवा जनाः ॥
अमत्सरा दयायुक्ताः सर्व्वभूतहितैषिणः ।
सत्योक्तिभाषिणश्चैव ज्ञेयास्ते वैष्णवा जनाः ॥
पितृभक्ता मातृभक्ता चातिपोषणतत्पराः ।
धर्म्मोपदेशिनो ये च ज्ञेयास्ते वैष्णवा जनाः ॥
समानं ये च पश्यन्ति त्वाञ्च माञ्च महेश्वरम् ।
कुर्व्वन्ति पूजामतिथेर्ज्ञेयास्ते वैष्णवा जनाः ॥
वेदविद्यानुरक्ता ये द्विजभक्तिरताः सदा ।
नपुंसकाः परस्त्रीषु ज्ञेयास्ते वैष्णवा जनाः ॥
एकादशीव्रतं ये च भक्तिभावेन कुर्व्वते ।
गायन्ति मम नामानि ज्ञेयास्ते वैष्णवा जनाः ॥
देवायतनकर्त्तारस्तुलसीमाल्यधारिणः ।
रुद्राक्षधारिणो ये च ज्ञेयास्ते वैष्णवा जनाः ॥
मत्पादसलिलैर्येषां सिक्तानि मस्तकानि वै ।
मम नैवेद्यमश्नन्ति ज्ञेयास्ते वैष्णवा जनाः ॥
शङ्खचक्रगदापद्मैरङ्कितानि ममायुधैः ।
ब्रह्मन् येषां शरीराणि ज्ञेयास्ते वैष्णवा जनाः ॥
कर्णयोश्चैव शीर्षेषु तुलसीपत्रमुत्तमम् ।
सततं दृश्यते येषां ज्ञेयास्ते वैष्णवा जनाः ॥
तृणानि तुलसीमूलाद्द्ये चिन्वन्ति नरोत्तमाः ।
सिञ्चन्ति तुलसीं ये च विज्ञेयास्ते च वैष्णवाः ॥
तुलसीमूलमृद्भिश्च तिलकानि नयन्ति ये ।
तुलसीकाष्ठपङ्कैश्च विज्ञेया वैष्णवा जनाः ॥
गङ्गास्नानपरा ये च गङ्गानामपरायणाः ।
गङ्गामाहात्म्यवक्तारो विज्ञेयास्ते च वैष्णवाः ॥
धात्रीफलस्रजो येषां गलेषु कमलासन ।
यजन्ति ये च तन्मन्त्रैर्व्विज्ञेयास्ते च वैष्णवाः ॥
शालग्रामशिला येषां गृहे वसति सर्व्वदा ।
शास्त्रं भागवतञ्चैव ज्ञेयास्ते वैष्णवा जनाः ॥
सम्मार्जयन्ति ये नित्यं मम स्थानानि सर्व्वदा ।
दीपं यच्छन्ति तत्रैव ज्ञेयास्ते वैष्णवा जनाः ॥
शीर्णं मन्मन्दिरं ये च कुर्व्वते नूतनं पुनः ।
तत्रायनञ्च शोभाञ्च ज्ञेयास्ते वैष्णवा जनाः ॥
अभयं ये च यच्छन्ति भीतेभ्यश्चतुरानन ।
विद्यादानञ्च विप्रेभ्यो ज्ञेयास्ते वैष्णवा जनाः ॥
क्षुत्तृट्प्रपीड़ितेभ्यश्च ये यच्छन्त्यन्नमम्बु च ।
कुर्य्युर्ये रोगिशुश्रूषां ज्ञेयास्ते वैष्णवा जनाः ॥
आरामकारिणो ये च पिप्पलारोपिणोऽपि च ।
गोसेवां ये च कुर्व्वन्ति ज्ञेयास्ते वैष्णवा जनाः ॥
अत्यन्तभक्ता ये ब्रह्मन् पितृयज्ञं प्रकुर्व्वते ।
कुर्व्वन्ति दीनशुश्रूषां ज्ञेयास्ते वैष्णवा जनाः ॥
तड़ागग्रामकर्त्तारः कन्यादानप्रदाश्च ये ।
सेवन्ते स्वगुरौ ये च ज्ञेयास्ते वैष्णवा जनाः ॥
सेवन्ते ज्येष्ठाभगिनीं ज्येष्ठं भ्रातरमेव च ।
परनिन्दां न कुर्व्वन्ति ज्ञेयास्ते वैष्णवा जनाः ॥
देवस्वं ब्राह्मणद्रव्यं परस्वञ्च चतुर्म्मुख ।
पश्यन्ति विषवद्द्ये च ज्ञेयास्ते वैष्णवा जनाः ॥
पाषण्डसङ्गरहिताः शिवभक्तिपरायणाः ।
चतुर्द्दशीव्रतरता ज्ञेयास्ते वैष्णवा जनाः ॥
बहुनात्र किमुक्तेन भाषितेन पुनः पुनः ।
मदर्च्चां ये च कुर्व्वन्ति ज्ञेयास्ते वैष्णवा जनाः ॥
वैष्णवेषु गुणाः सर्व्वे दोषलेशो न विद्यते ।
तस्माच्चतुर्मुख त्वञ्च वैष्णवो भव साम्प्रतम् ॥
समाराधय मां नित्यं क्रियायोगैः प्रजापते ।
सर्व्वमेव सुभद्रं ते भविष्यति न संशयः ॥
भूयः पूर्व्वस्थितमिव सृज्यतां सकलं जगत् ।
इत्युक्त्वान्तर्द्दधे देवस्तत्रैव जगदीश्वरः ॥
ततस्तु पूर्व्ववद्ब्रह्मा सृष्टवान् सकलं जगत् ।
क्रियायोगैर्हरिं यष्ट्वा जगाम परमं पदम् ॥
ये पठन्ति ममाध्यायं भक्त्या नारायणाग्रतः ।
सर्व्वपापविनिर्म्मुक्ता अन्ते यान्ति हरेः पदम् ॥”
इति पाद्मे क्रियायोगसारे २ अध्यायः ॥*॥
कालिङ्ग उवाच ।
“इदञ्चर्षिसुरेण कथितो रहस्यः परमो मम ।
वैष्णवानि यद्योर्योऽभूत् संवादस्तं ब्रवीमि ते ॥
स्वपुरुषमभिवीक्ष्य पाशहस्तं
वदति यमः किल तस्य कर्णमूले ।
परिहर मधुसूदनप्रपन्नान्
प्रभुरहमन्यनृणां न वैष्णवानाम् ॥”
इति श्रीविष्णुपुराणे तृतीयेऽंशे यमगीतं ७
अध्यायः ॥*॥ अपि च ।
“कर्म्मण्यखिलानि कर्म्माणि यतः साधुर्हरिः
स्वयम् ।
मन्ये न भौतिको देहो वैष्णवस्य जगत्त्रये ॥”
इति कल्किपुराणे १० अध्यायः ॥
वैष्णवाचमनं, क्ली, (वैष्णवस्याचमनम् ।) विष्णुपूजादिपूर्व्वकर्त्तव्यकर्त्तृसंस्कारकाङ्ग--ॐकारादिनमोऽन्तचतुर्थ्यन्ततत्तन्नामोच्चारणपूर्व्वकत्रिर्ज्जलपानादि । यथा,—
“त्रिःपाने केशवं नारायणं माधवमप्यथ ।
प्रक्षालने द्वयोः पाण्योर्गोविन्दं विष्णुमप्युभौ ॥
मधुसूदनमेकञ्च मार्ज्जनेऽन्यं त्रिविक्रमम् ।
उन्मार्ज्जनेऽप्यधरयोर्व्वामनश्रीधरावुभौ ॥
प्रक्षालने पुनः पाण्योर्हृषीकेशञ्च पादयोः ।
पद्मनाभं प्रोक्षणे तु मूर्द्ध्नि दामोदरं ततः ॥
वासुदेवं मुखे सङ्कर्षणं प्रद्युम्नमित्युभौ ।
नासयोर्नेत्रयुगलेऽनिरुद्धं पुरुषोत्तमम् ॥
अधोक्षजं नृसिंहञ्च कर्णयोर्नाभितोऽच्युतम् ।
जनार्द्दनञ्च हृदये उपेन्द्रं मस्तके ततः ॥
दक्षिणे तु हरिं बाहौ वामे कृष्णं यथाविधि ।
नमोऽन्तञ्च चतुर्थ्यन्तमाचामेत् क्रमतो जपन् ॥
अशक्तः केवलं दक्षं स्पृशेत् कर्णं तथा च वाक् ।
कुर्व्वीतालभनं वापि दक्षिणश्रवणस्य वै ॥”
तथा च वाक् इति यतस्तथैव वचनमस्ति ।
कुर्व्वीतालभनं वापीति मार्कण्डेयपुराणवचनमतो न पौनरुक्तम् । इति श्रीहरिभक्तिविलासे ३ विलासः ॥
वैष्णवाचारः, पुं, (वैष्णवानामाचारः ।) विष्णुभक्तानामाचरणम् । यथा,—
“अथाचारा बहुविधाः शिष्टाचारानुसारतः ।
श्रीवैष्णवानां कर्त्तव्या लिख्यन्तेऽत्र समासतः ॥”
अथाचाराः श्रीविष्णुपुराणे और्व्वसगरसंवादे गृहस्थाचारकथनारम्भे ।
“देवगोब्राह्मणान् सिद्धान् वृद्धाचार्य्यांस्तथा-
र्च्चयेत् ।
द्विकालञ्च नमेत् सन्ध्यामग्नीनुपचरेत्तथा ॥
सदानुपहते वस्त्रे प्रशस्ताश्च तथौषधीः ।
गारुड़ानि च रत्नानि बिभृयात् प्रयतो नरः ॥
प्रसिद्धामलकेशश्च सुगन्धिश्चारुवेशधृक् ।
किञ्चित् परस्वं न हरेत् नाल्पमप्यप्रियं वदेत् ।
प्रियञ्च नानृतं ब्रूयान्नान्यदोषानुदीरयेत् ।
नान्याश्रयं तथा वैरं रोचयेत् पुरुषेश्वरः ॥
न दुष्टयानमारोहेत् कूलच्छायां न संश्रयेत् ।
विद्विष्टपतितोन्मत्तबहुवैरातिकीटकैः ॥
बन्धकीबन्धकीभर्त्तृक्षुद्रानृतकथैः सह ।
तथातिव्ययशीलैश्च परिवादरतैः शठैः ॥
बुधो मैत्रीं न कुर्व्वीत नैकः पन्थानमाश्रयेत् ।
नावगाहेज्जलौघस्य वेगमग्रे जनेश्वर ॥
प्रदीप्तं वेश्म न विशेन्नारोहेच्छिखरं तरोः ।
न कुर्य्याद्दन्तसङ्घर्षं न कृष्णीयाच्च नासिकाम् ।
नासंवृतमुखो जृम्भेत् श्वासकासौ विवर्ज्जयेत् ।
नोच्चैर्हसेत् सशब्दञ्च न मुञ्चेत् पवनं बुधः ॥
नखान्न वादयेच्छिन्द्यान्न तृणं न महीं लिखेत् ।